शृङ्गारस्य फ्रोईड् सम्बन्धी वाचनम्

कामदेवस्य प्रादुर्भावः शृङ्गारः। तदुत्पत्तिहेतुभूतया उत्तमप्रकृत्या सहितो रसः शृङ्गारः इत्यभिधीयते। शृङ्गारोऽयं भारते रसादृते तत्स्वभावेन दर्शनेष्वपि बहु तर्कितो भवति। इन्द्रियजयः, मनसो यम इत्यादिषु शृङ्गारस्य तद्गतकामस्य च अस्पृश्यता कल्पिता। इतरत्र तु कामस्य कलारूपेण परिणतिश्च संभूता। चतुष्षष्टिषु कलासु कामकला सभ्या जाता। नृमृगयोस्समानस्यास्य विकारस्य सोद्देश्यतावाप्त्यै विवाहसंस्कारेण धर्मशास्त्राणां प्रवृत्तिरभवत्। तथा कालान्तरे शृङ्गारस्य मानवसाधारणः रमणीयः च भावः अलभत। काव्यनाटकादिषु प्रतिभापरिलासभूमिषु शृङ्गारोऽयं वसन्तोत्सवमसृजत। प्राणिवर्गस्य समस्तस्य अन्योन्यसहवर्तित्वस्य सूत्रात्मस्वरूपेण शृङ्गारमभिषिच्यत। अलौकिकमप्रमेयञ्च किञ्चिदर्थतलं शृङ्गारेऽन्तर्भवतीति विज्ञाः विदुः।

रसत्वेन शृङ्गारं तत्स्थायीभावं रतिञ्च स्वीकृत्य व्यवच्छिद्यैदम्प्राथम्येन भरतमुनिरेवापठत्। पञ्चमवेदे नाट्यशास्त्रे सः रसाष्टकमङ्गीचकार। तत्र सर्वश्रेष्ठत्वं शृङ्गारस्य च कल्पितम्। अन्ये रसास्तु शृङ्गारसामीप्यात् शोभायमानाः इति व्यपदिष्टाः। तथा शृङ्गारस्य 'रसराज' इति बहुमतिमलभत। बहुतरमुपयुक्तः एवम् उपयोक्तुमुपदिष्टः च काव्यमीमांसाभिः-अयं रसः, सकृल्लौकिके आत्मीये च तले विराजमानः रसः, रसान्तराणामपि चमत्कारकारः रसः इत्यादीनि विशेषणानि शृङ्गारस्य रसराजभावे मकुटीभूताः भवन्ति। दार्शनिकरीत्या विवक्षायामपि सिद्धो शृङ्गारस्य रसराजविलासः। अन्यूनानुकूलालम्बने शृङ्गारवृत्तिः, विषयविषयिणोस्सम्बन्ध इव। विषयान् ध्यायतस्तु तेष्वेव विषयेषु सङ्गः सञ्जायते। विषयलाभे रतिः, अनुभवादेशे अङ्गत्वेन हासः, विषयवियोगे शोकः चोत्पद्यन्ते। सङ्गात् कामः, कामात् क्रोधः, क्रोधात्सम्मोहश्चेति दर्शनम्। तथा विषयसंसर्गपालनायोत्साहः, विषयविरुद्धान् प्रति क्रोधः, विषयनाशोत्कण्ठाजन्यो भयः, सम्मोहजा जुगुप्सा, विषयस्य मायिकलोकभूतः विस्मयः चेति अनुभवामः। एवं रससर्वस्वस्यापि वृत्तिः शृङ्गाराश्रिता एवेति गम्यते। रतिशृङ्गारयोर्लक्षीकरणे प्रायेण शरीरकल्पना जायेत। तथापि विशेषदृष्टौ सः प्राणिसमूहान् परस्परमाकृष्यमाणः कश्चिद्विकारः तज्जन्या अनुभूतिश्च इति कथ्यते।

एतादृशस्य शृङ्गारादर्शस्य तु जीवनगतेर्व्यवस्थापने महान् प्रभावः स्यात्। शृङ्गारस्येमामास्वादनपरतां अवबुध्यैव कवयः तद्रसप्रधानतां अनेकानां काव्यानां रचनायां निमग्नाः अभवन्। ते काव्यानां शृङ्गाररसप्रधानत्वं निष्कृष्टं व्यपदिष्टाश्चासन्। दर्शनैः औदासीन्येन कविभिरुत्तमत्वेन च परिगणितेऽस्मिन् शृङ्गारलोके शास्त्रदृष्ट्या प्रथमतो आगतः डा. सिग्मण्ड् फ्रोईड् नामको मनोवैज्ञानिकः। यद्यपि शृङ्गारपदं तस्मै अन्यमपरिचितं चाभवत् तथापि तद्रसानुभूतिं रत्यानन्दञ्च तेन सुष्टु पठिते। स्वप्नः तन्निदानभूता चिन्ता च रत्यधिष्ठितायामिच्छायां वर्तते इति वादः तं शृङ्गारसम्बन्धिपठने सहकारिणं करोति। तस्य विख्याते मनोविश्लेषणपठने शृङ्गारस्य प्रामुख्यमयच्छत्। परन्तु सः आर्जवेनैव रसमिमं लैङ्गिकता, संभोगः इत्यादिभिर्नामभिः संबोधयामास। तस्मादप्युपरि चिन्तिता भारतीयधिषणा तेन न प्रयोगक्षमा आसीदिति अवगन्तव्यम्। तथापि लौकिकजीवने काव्ये च शृङ्गारस्य प्रायोगिकी प्रसिद्धिः कियद्वर्तते इत्यवगन्तुं फ्रोईड्कृतं यत्नं प्रशंसनीयमेव। तस्य स्वप्नानामपग्रथनम् (The Interpretation of Dreams) इति विश्वविख्याते ग्रन्थे सत्सु स्वप्नव्याख्यानेषु समूहमनसि शृङ्गारस्य व्याप्तिं भावान्तरान् च गहनतया तर्कयति।

स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः इति रसगङ्गाधरकारः शृङ्गारस्य स्थायीभावं लक्षयति। व्याख्यानेषु पुरोगतेषु स्त्रीपुंसोः इति दलं लुप्यते। तामिमां रतिं फ्रोईड् चिन्तानां प्रवृत्तीनां स्वप्नस्य च आधारतया परिगणयति। संभोगेच्छात्वेन लैङ्गिकवस्तुतात्वेन विशेषयितुपशक्याः आशयाः नैव भवन्ति इति तैरुच्यते। निसर्गसिद्धान् प्रवृत्तीन् चिन्ताश्च सः अनेन आशयेन परिभाषयति। किन्तु मानवानां सकलप्रवृत्तयोऽपि बोधतले एव कामविकारपूर्तीकरणाय क्रियन्ते इति तेन न कुत्रचित्प्रस्तूयते। किन्तु सर्वेषां प्रवृत्तीनां चिन्तानाञ्च सुशकं किञ्चिन्मूलं रत्यां अधिष्ठितमिति प्रस्तावः। अतः एव शृङ्गारस्य राजत्वं स्यात्। रसार्णवसुधाकरे शृङ्गारमेवं लक्षयति-

यूनयोरन्योन्यविषया स्थायिनीच्छा रतिर्भवेत्।
निसर्गेणाभियोगेन संसर्गेणाभिमानतः।।[1] इति।

सरस्वतीकण्ठाभरणे भोजराजः- 'रतिः निसर्गसंसर्गौपम्याध्यात्मावियोगजा, संप्रयोगाभिमानोत्था विषयोत्था च कथ्यते' इति प्रस्तौति। रतेः निदाने भावान्तराणामस्तित्वम् एवं स्पष्टीक्रियते। प्रथमतो निसर्गसिद्धा। कुमारसंभवे पार्वत्याः रतिः जन्मान्तरवासनारूपेति प्रदर्शयन् कश्चिद्भागो वर्तते।[2] सा रतिरेव तदाधारीभूतचिन्ताप्रवृत्योः नैदानिका। नैसर्गिकीमिमां रतिं शैशवानुभवैः संयुज्य फ्रोईड् विशकलयति। जनितकसंक्रमेण मातापित्रोः विकाराणां सूक्ष्मांशः शिशावपि विद्यते। स्वप्नदशायां अनुभूयमानानां दर्शनानां भूर्यपि भागाः शैशवानुभवैः सुतरां संबद्धाः स्युः। यौवने जाग्रति क्रियमाणेषु बह्वीषु प्रवृत्तिष्वपि शैशवगतेच्छायाः पूर्तीकरणार्थं प्रचाल्यमानं यत्नविशेषं द्रष्टुं पारयाम इति फ्रोईड् भणति। शैशवकालीनोऽनुभवः अबोधतले सुस्पष्टतया अङ्गीकृतो भवति, तथा अनन्तराणां अङ्कनानां तावती स्पष्टता शक्तिश्च न भवेताम्, विषयान्तरप्रवेशस्य बाहुल्यात्। शिशोः मातृस्तन्यपानं, मातुः स्तन्यदानञ्च रत्यानन्दानुभवेच्छामूलके स्तः इति फ्रोईड् वादः। अथवा मातृशिशौ शृङ्गारानुभूतौ निमग्नौ भवतः इति। परन्त्विह केवलसंभोगता नोद्दिष्टा। रसानन्दमेव कलयति केवलम्। तथा चेह स्त्रीपुंसयोः इति दलस्याव्याप्तिरप्यस्ति, शिशोः स्त्रीत्वे लक्ष्ये क्वचित् एकदेशे। वात्सल्यमपि रतिजन्यमेवेत्यभिज्ञमतम्। वात्सल्यमूलत्वेन प्रस्तौतुं नान्ये स्थायीभावाः युक्ताः सन्ति। अस्याः रत्यानन्दवाञ्छायाः अनुस्यूततायामेव मातापित्रोः अपत्यैः सह प्रेमपूर्णं जीवितं यापयितुं शक्येते। एवंविधभारतीयशृङ्गारदर्शनानभिज्ञैः फ्रोईड् बहु भर्त्सितो बभूव। संसर्गरतिं न विशेषेण वक्तव्यम्।

औपम्या तु रतिः फ्रोईड् सविशेषरीत्यैव पठितवान्। प्रतिनिधायमानप्रतीकाः (Representatory symbols) इत्यस्मिन्नध्याये विषयमिमं गाढं स्पृशति। उपमारतेः दृष्टान्तेन- 'मृगयान्तरितापि दशरथस्य प्रियविषया रतिस्तदीयकेशकलापसदृशकेकिकलापदर्शनेन उत्पद्यते' इति सन्दर्भो उद्धृतः।[3] प्रतिनिधीकरणस्य चित्रणं हि इह क्रियते। 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति ख्याता। केकीकलापादयो विभावादयः। सः प्रियायाः संभाषणस्य प्रतिनिधित्वेन प्रतीकत्वेन वा वर्तते। शृङ्गारमूलायाः कस्याश्चिदिच्छायाः प्रतिबिम्बात्मकं पूर्तीकरणमिह संभवति। स्वप्नेऽपि इदमेव प्रचलति। येन प्रतीकयोगेन इच्छा साक्षात्कृता जायते तमेव प्रतीकं उपबोधमनः उपयुज्यते। इच्छामूलशृङ्गाररसानुभूतिरेव तादृशानां स्वप्नानाञ्चोद्देश्यता। विषयस्य तद्रूपत्वेनोपयोगेन क्वचिदिच्छास्फूर्तिर्न स्यात्। अतः एवोपबोधमनः अथवा प्रतिभा कविकर्मकौशलेन शृङ्गारमनुभववेद्यं करोति।

अध्यात्मशृङ्गारः स्वात्मप्रामाण्यमात्रम्। दुष्यन्तस्य निजचित्तसन्तापप्रत्ययेन शापविस्मृतायामपि शकुन्तलायां रतिः। केवलग्राम्यलैङ्गिकतायाः चेष्टानां च निवासभूमिर्न शृङ्गार इति अवगन्तुं अध्यात्मशृङ्गारः सहायको भवति। अयं निर्मले मनसि निसर्गसृष्टः संस्कारसम्पुष्टतया प्रकाशमानश्च वासनाविशेषस्य प्रकर्ष एव। अबोधतले उत्पन्नान् इच्छाप्रेरणादीन् कुत्रचित् फ्रोईड् वर्णयति। तत्राध्यात्मशृङ्गारस्य लाञ्छना दृश्यते। अबोध एव सर्वासामिच्छानां निवासस्थानः। तत्र व्याप्ताः ताः सदा बोधमण्डलमवाप्तुं यतन्ते। कुत? तासामिच्छानां विषयलोकेन शृङ्गारोत्कर्षात्। प्रवृत्तिरेवेच्छापूरणाय सञ्चितः संभोगमार्गः भवति। इच्छानां बलेन नियमनात् बहिःस्फुरणाय प्रेरणा शक्ता जायते इति फ्रोईड्। तदा शृङ्गारस्यानुभावत्वेन गृहीतुं योग्येषु केषुचिदपि विषयेषु मनः रसानुभूत्यै प्रयतते। मनसः तन्मार्गणं एवेह अबोधे इव अध्यात्मशृङ्गाररूपेण जायते।

विप्रलम्भशृङ्गारस्य विभावानुभावसञ्चारिषु फ्रोईड् तादात्म्यीकरणप्रकृतिं पश्यति। तां हिस्टीरिक् (Hysteric) व्यक्तिस्वभावेन संयुज्य फ्रोईड् पठितवान्। परन्तु भारतीयाः नेमां रोगरूपेण गणयन्ति। किन्तु रसानुभूतेः स्तरि संभूयमानः उन्मादः एव केवलम्। दशसु कामदशासु कश्चिदुन्मादः, तं साहित्यदर्पणे एवं विवृणोति-चित्तसम्मोह उन्मादः — अस्थानहासरुदितगीतप्रलपनादिकृतम्[४] इति। हिस्टीरियागतभ्रमात्मकतायामपि स्वप्ने इव कश्चित् संभोगविषयया चिन्तयापि तादात्म्यीकृतो भवेत्। फ्रोईड् मते इमे तादात्म्यीकरणं आशयवक्रीकरणञ्च शैशवानुभवानां समीपकालानुभवानाञ्च अधिष्ठाने संभवतः।


रसोत्पत्तेः प्राधानिकी काचित्प्रक्रिया साधारणीकरणं भवति। अभिधायकत्वं, भोजकत्वं, भावकत्वम् इत्यादीनां क्रियानां सङ्कलितरूपं हि साधारणीकरणम्। अभिधायकत्वेन शकुन्तला शब्दे श्रुते कण्वपुत्र्याः, दुष्यन्तप्रणयिन्याः चित्रं व्यक्तञ्जायते। भावकत्वेन कण्वपुत्र्यादिकं शकुन्तलायाः विशेषणजालं विना तां सामान्यस्त्रीरूपेण गृह्णाति। रतिरपि साधारणीकृता। एवं शकुन्तलागता दुष्यन्तस्य रतिः सामान्येन स्त्रियां पुरुषस्य रतिः इति विपरिणमते। भोजकत्ववशात् रङ्गप्रदर्शितो काव्यनिवेशितो वा स्थायीभावः प्रेक्षके साधारणीकृतस्थाय्या युज्यते-एकीभवति। रसानुभूतेः प्रक्रियायामस्यां स्वाप्निकविषयानुभवे प्रचाल्यमानां केषाञ्चित्परिणामानां प्रतिबिम्बत्वं दृश्यते। सान्द्रीकरणं (condensation) स्थानभ्रंशः (Displacement) प्रतिनिधीकरणं (Representation) इति स्वप्नप्रक्रियायाः अङ्गान् फ्रोईड् वर्णयति। शृङ्गारजायाः इच्छायाः आशयसम्पुटं किञ्चिदान्दोलनं अबोधादुद्बुद्ध्यते। उपबोधस्तरे विशालस्य तस्याशयस्य वैपुल्यं सान्द्रीकृत्वा सङ्गृह्णाति। यथा अभिधायां भावकत्वस्य प्रवृत्तिः। तत्रैव शकुन्तलां कथायाः विमुच्य सहृदयस्य मनसि स्थितया साधारणस्त्रिया योजयति च। एवमेव शृङ्गारजन्यानामिच्छानामपि शृङ्गारं विहाय उपबोधशोधनया विकारान्तरप्रापणं भावयति। तदिदं प्रापणं शृङ्गारप्रतिनिधायकत्वेन विषयान्तरसिद्धावस्तं याति। प्रतिनिधीकरणे प्रतीकवत्करणविशकलनात्मको उपविभागः नाट्यशास्त्रे फ्रोईड् मते च द्रष्टुं शक्नुमः। एवं विभावानुभावसञ्चारीणां संयोगस्य अनुभूतावन्तत्वमिव स्वप्नस्यापि इच्छापूरणेऽस्तं गमनं सिद्धम्।

स्वप्नरूपीकरणस्य प्राथमिककारणत्वेन, फ्रोईड् मनुष्येषु मानसिकस्तरद्वयं निरूपयति। तयोः प्रथमः स्वप्ने प्रकटीभूयमानां इच्छां स्वीकरोति उद्धरति वा। अन्यस्तु स्वप्नेच्छायां शोधशक्तिस्वरूपेण

तिष्ठति। द्वितीयेऽस्मिन्नाशयानां वक्रीकरणं प्रतिनिधीकरणञ्च संभवतः। सेयं द्वितीया शक्तिः प्रतिभेति कीर्तिता। कविगतप्रतिभायाः वक्रोक्तौ ध्वनौ च सत् प्राधान्यं विख्यातमेव। वैचित्र्यभङ्गीभणितेः वक्रोक्त्याः षड्वक्रताः अस्याः प्रक्रियायाः व्यवस्थां सुष्टु विचारयति, ध्वनिस्तु रसानुभूतिञ्च। उपबोधप्रतिभया अस्पृश्या न कापि इच्छा अबोधात् बोधमण्डलं आप्नोति।

विभावानुभावसञ्चारीभावाः प्रतीकाः एव भवन्ति। सर्वेऽपि इमे शृङ्गारेण सामीप्यं भजन्ते इति फ्रोईड् कथयति। शृङ्गारप्रतीकत्वेन उद्यानं, पुष्पं, मन्दमारुतः, चन्द्रिका इत्यादिकं द्योतयति। स्वप्ने तु एतत्सर्वं प्रतिनिधीभवति। शोकस्य द्योतनेऽपि तत् सुगन्धवाहिनः सुन्दरपुष्पस्य काण्डस्थः कण्टकः इत्यादिवदेव द्योत्यते। कस्मिंश्चिदपि भीतिदे दर्शने इच्छावाहिनं विषयं द्रष्टुं शक्नुमः इति सः वदति। प्रतीकवत्करणन्तु न केवलं स्वप्नानामेव सविशेषता। अबोधकल्पनायामेव तदधिकतयाऽनुभूयते। केषुचित्तु प्रतीकेषु प्रतीकादृते तत्प्रतिनिधायमानस्वप्नचिन्तानामपि सामान्यगुणाः अपि स्पष्टीभवन्ति। प्रतीकात्मकतया वर्तमाने संयुज्यमानाः विषयाः प्राचीनकाले आशयपरतया भावपरतया च एकीकृताः स्युरिति फ्रोईड् अभिप्रैति।

इच्छायाः शृङ्गारजत्वं प्रथमतो दृष्टम्। सेयं इच्छा तस्याः सफलतायै रसानुभूत्यै च विषयान्तरान् तथा संयोगकरणस्य रीतिविधानं-रसनिष्पत्यै कथं प्रवर्तते इति श्रद्धेयः। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतेन सङ्गृह्योक्तम्। भावस्मरणव्यवस्था हि संयोगस्याधिष्ठानम्। तदिह फ्रोईड् मानसिकयान्त्रिक्या ण्दर्शयति (Psychic Apparatus) प्रतिप्रेरणायाः प्रवृत्तियोगः स्मरणाङ्कनैः वासनानामनुयोजनैश्च सिद्ध्यति।



प्रेरणया प्रथमस्मरणाङ्कनं संभवति। प्रथमस्मरणामूलस्यानुगुणं अनुकूलं च यदि द्वितीयं भवति चेत् उद्दीपनस्य प्रथमतो द्वितीयं सुगमतया प्रवेष्टुं शक्यते। तथैव विभावानुभावसञ्चारिणः एकरसात्मकाः अनुगुणाः च भवेयुः रसनिष्पत्यै। ते तु स्मरणारूपाः वासनारूपाः च भवन्ति। अत एव संयोगश्च सिद्ध्यति। प्रेरणायां शृङ्गारसंवेदनक्षमायाः इच्छायाः सन्निवेशादेव विषयान्तरप्रवेशस्य सुगमत्वात् अन्ते रसनिष्पत्तिः (Motor End) संभवति।

एतादृशं सहकारिपठनं काव्यगतो रसः जीवने कथं प्रतिबिम्बते इति ज्ञातमुपकरोति। शृङ्गारस्य रसराजस्थानं कल्पयित्वा रसान्तराणां जीवरूपेण शृङ्गारं सन्निवेश्य, आचार्याः अङ्ग-अङ्गाङ्गिभावेन तद्व्यवस्थापितं च चकार। फ्रोईड् मते प्रत्यक्षदृष्टौ संभोगवाञ्छां सर्वेषामप्यधिष्ठानत्वेन उच्यते

अस्मिन् मते उन्नीतेऽपि सा कल्पना विविधानां व्यवस्थानां नियामकतयैव रूपीकृता इति न विस्मरेयुः। तथा च कालिकदेशिकभेदाश्च तत्र आयान्ति। तथापि काव्यस्य स्वाप्निकसर्जनात्मकत्वसिद्धौ भारतीयाः पौरस्त्याश्च न महतीं विभिन्नतां प्रकटयन्ति। तथा चेत् काव्यमीमांसा स्वप्नमीमांसया संयुज्य पठितुं पारयामः।

References:

१. रसार्णवसुधाकरः, पृ. २११.
२. कु. द. ८२. (5:82)
३. रघु. ६.६७.
४. साहित्यदर्पणम्, पृ. २९९.

ग्रन्थसूची

रसगङ्गाधरः, Motilal Banarsidass Publications.
रसार्णवसुधाकरः, Edited by T. Venkatacharya, The Adyar Library and Research Centre, 1979.
काव्यमीमांसा, Dr. K. Sukumara Pillai, Kerala Bhasha Institute.
साहित्यदर्पणम्, Krishna Das Academy.
नाट्यशास्त्रम्, Chowkhamba Sanskrit Series.
The Interpretation of Dreams, Sigmund Freud, E. copy, www.psychclassics.yorku.ca.
www.textec.com/criticism/freudian-criticism.html.